CC-0. Digitized by eGangotri and MIDF- Delhi

मातृशतकम्

शोककाव्यम्

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

काव्यकारः
प्रा.डा. नवराजकट्टेलः

CC-0. Jayatu Sanskritam, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतमिति संस्थायाः चतुस्त्रिंशत्तमं (३४) प्रकाशनम्

मातृशतकम्

शोककाव्यम्

काव्यकारः
प्रा.डा. नवराजकट्टेलः

प्रकाशकम्
जयतु संस्कृतम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रन्थस्य नाम : मातृशतकं शोककाव्यम् ।

रचनाकारः : प्रा.डा. नवराजकट्टेलः ।

प्रकाशकम् : जयतु संस्कृतम्, नेपालः ।

प्रकाशनसौजन्यम् : मोदनाथखनालः ।

प्रकाशनमितिः : २०८२।२।११
(नेपाले समायोजितस्य एकोनविंशतितमस्य विश्वसंस्कृत-सम्मेलनस्य (२०८२।३। १२-१६) अवसरे प्रकाशिता ।)

प्रकाशनप्रतयः : पञ्चशतम् (५००)

सर्वाधिकारः : रचनाकारे ।

मुद्रकः : किशोरअफसेटमुद्रणालयः, काष्ठमण्डपो नेपालः ।

मूल्यम् : : रूप्यकं ३००।-

ISBN : 978-9937-9902-2-6

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्गाकुमारीकट्टेलः
(वैक्रमाब्दस्य १९९०-२०७१।१२)

शून्यं मे किल जीवनं रसगतं मात्रा विहीनं जगत्
शून्यं मे भवनं च शून्यहृदयं कृष्णायितो भास्करः ।
कृष्णा भाति च चन्द्रिका रसमयी मातर्गतायां त्वयि
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नित्यं यज्ञरता च क्रोधरहिता लोभस्य दुत्कारिका
ईशे भक्तिरता चराचरकृतौ धर्मस्य सा पालिका ।
नित्यं पूजनशालिनी सुरनता सत्यस्य या सेविका
प्रेम्णाऽसौ मम मातरं पतिरतां 'कुक्षौ प्रभो स्थापय'

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समर्पणम्

इदं पुस्तकं मम मातामहाय ईश्वरीप्रसादघिमिरेमहोदयाय, मातामह्यै गौरादेव्यै च समर्पयामि। मातुलगृहे मम रसमयः, चाञ्चल्यपूर्णः अबोधमयो बाल्यकालो व्यतीतः। मातृवत् पितृवत् तदधिकञ्च ममत्वेन तौ मां लालनपालनपोषणं कृतवन्तौ। मम मातुलानी मातुलश्च आजीवनं स्नेहेन, श्रद्धया, ममत्वेन च पुत्रवत् आसिक्तवन्तौ, तावपि स्मरणीयौ स्तः ।



शीते शैलवने च मातुलगृहे श्रीबाल्यकालो गतो
दुग्धं तन्नवनीतभोजनरसं तक्रं, घृतं पायसम् ।
भुक्त्वा शुद्धसुभोजनं मधुमयं तृप्तिर्गतासीत्तदा
स्मृत्वा तत् किल बालजीवनकलां मोमुद्यते मे मनः ॥

गौरा सा खिल चेश्वरी मृदुमयौ मातामहौ चेश्वरौ
स्मृत्वा विप्रबुधौ च मातुलकुलं चित्तं तु हर्षायते ।
तौ देवौ मुनिकल्पकौ हितकरौ चित्ते नरीनृत्यतः
पूज्यौ स्नेहकरौ च नौमि मनसा भक्त्या तथा श्रद्धया ॥

- नवराजकटेलः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्मराजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं रक्षति। २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्छात्रावासस्य वा अग्रे स्मारकस्तम्भः स्थापितः।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नेपाल्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्याशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रदैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतं इति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालये अन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासाः जायममानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै सर्वकारतः आर्थिकसगयोगः वृद्धये च संस्थेयं सक्रिया वर्तते। उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरूका अस्ति। संस्कृतनाटकानां लेखने तेषां मञ्चने च संस्थेयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कार्यं कुर्वाणा वर्तते । रूपकाणां सङ्ग्रहः प्रकाशितश्चेत् सप्त नाटकानि च प्रकाशितानि सन्ति ।

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्य पर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति । १ पं. भीमकान्तपन्थी (२०५६,जगदम्बिकावैभव. महाकाव्यम्)

२.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्य)

३. डा. हरिहरशर्म-अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४ प्रा.डा. माधव भट्टराई (२०५८, सत्यशाइचरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधव ढकाल (२०६०, लिच्छविकालिकानामभिलेखानां साहित्यिकं परिशीलनम्), ६. भैषज्य गोपाल वैद्य किंजल्क (२०६१ हिमाद्रिमहिमा काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचार-सानुवादः) ८. प्रा.डा. टीकाराम अधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६,श्रीरामशरणं मम, काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (काव्यकविता), ११. प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२. प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३,गतो मदीयो ननु कुत्र देशः, संस्कृतभारतीगौरवम्), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च ४००० श्लोकाः), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश), १६. आचार्य पूर्णचन्द्रढुङ्गेल, (२०७९, देवाधिदेवमहादेवश्रीनीलकण्ठमहाकाव्यम्)

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति । तत्र सम्मानिताः विद्वांसः सन्ति - डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः । २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ । खेमराजकेशवशरणः काष्ठमण्डपं समागन्तुमशक्यत्वात् सचिवो नवराजकट्टेलः, अपाध्यक्षो विष्णुप्रसाददेवकोटा देवघट्टे गत्वा सम्मानं कृतवन्तौ । २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः(तन्त्रन्यायविद्याकेशरि), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः),

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरि) , प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरि) च सम्मानिताः। २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसो सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरि), प्रा.डा. रामचन्द्रगौतमः (धर्मशास्त्रविशारदः) , प्रा.डा. गोपिवन्दचौधरी (न्यायविद्याकेशरि) , प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः) ।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ खीष्टाब्दे अत्र सम्मेलनं सञ्जातञ्चेत् तेन २०२४ तमे खीष्टाब्दे नेपाले तत्सम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य नेपाले सम्पादनाय एका संयोजनसमितिश्च सङ्घटिता। परन्तु विश्वविद्यालयस्य तेन सङ्घटितायाः समितेश्च सक्रियतायाः अभावात् जयतु संस्कृतं संस्थैव अग्रपङ्क्तौ समागत्य विश्वसंस्कृतसम्मेलनस्य सफलतायै कार्यं सम्पादयितुं सक्रिया जाता। इदमपि कार्यं संस्थायाः सक्रियतायां सञ्जातम् इति आस्माकीनो विश्वासः।

भाषायोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितं तदनुसारं १४९०० जनाः मम संस्कृतमेव मातृभाषा इति पञ्जीकरणं कृतवन्तः। ६००० जनाः सेयं संस्कृतभाषा मम द्वितीया भाषा इति लिखितवन्तः। १,३५,००० जनाः संस्कृतभाषा मम पूर्वजानां भाषा इति पञ्जीकरणं कृतवन्तः।

उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिः महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्र अयोगेन संस्कृतशिक्षा विस्मृतासीत्। संस्थया बलपूर्वकं नेपाले संस्कृतशिक्षा अनादितया प्रचलिता, प्रवहमाणा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चास्ति इति स्मारिता। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽ ष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतः।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्य उद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निवद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजना चाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति।

संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थनिर्माण-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव। अद्य पर्यन्तं पञ्चदश पुस्तकानि प्रकाशितानि। सप्तदश पुस्तकानि मुद्रणालये सन्ति।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं, सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकानां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि भवन्ति एव। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। तस्यैवायमपरो ग्रन्थः 'कर्मफलम्' इति एकविंशति संस्कृतरूपकाणां सङ्ग्रहः २०८१ भाद्रमासे प्रकाशितः।

अहं नवराजकट्टेलमहोदयं २०४० वैक्रमाब्दादेव जानामि, परिचिनोमि च, परन्तु अहं नेपालसर्वकारस्य सेवायां वर्तमानोऽनेकेषु जनपदेषु मम सेवाव्यवस्थापनमभूत्। अतः मया तेन साकं पर्याप्तसम्पर्कस्यावसरो नैव प्राप्तः। अथ च २०५४तमे वैक्रमाब्दे 'जयतु संस्कृतमान्दोलनं २००४' इत्यस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वर्णमहोत्सवसमारोहे एकस्यामेव समित्यां स्थित्वा कार्यसम्पादनस्यावसरो लब्धः। तस्मिन् समये स सदस्यसचिवत्वेन कार्यं सम्पादयन्नासीत्।

ततोऽद्यपर्यन्तं आवामेकस्यामेव समित्यां स्थित्वा संस्कृतवाङ्मयस्य, पौरस्त्यसंस्कृतेश्च विकासाय, संरक्षणाय, संवर्द्धनाय च कार्यं कुर्वन्तौ स्वः। नवराकट्टेलः ममानुजः स्पृहणीयव्यक्तिरप्यस्ति।

काष्ठमण्डपे नेपालवेदविद्याश्रमे चत्वारि वर्षाणि समधीत्य एकोनविंशत्यां वयसि रानीपोखरीसंस्कृतमाध्यमिकविद्यालयेऽयं पठनाय सन्नद्धो जातः। तदनु पूर्वमध्यमापरीक्षां समुत्तीर्य त्रिभुवनविश्वविद्यालयस्य वाल्मीकिविद्यापीठे प्रवीणताप्रमाणपत्रस्य कक्षायां पठित्वा परीक्षाञ्च समुत्तीर्य ततः एव प्रथमश्रेण्यां शास्त्रिकक्षा च समुत्तीर्णा। तदनु नेपालिविषयमवलम्व्य प्रथमश्रेण्यां स्नातकोत्तरकक्षा, शिक्षाशास्त्रिकक्षा च समुत्तीर्णा। तदनु कट्टेलः नेपालसंस्कृतविश्वविद्यालये नेपालिविषयस्य उपप्राध्यापकत्वेन नियुक्तो जातः। तत्पश्चादयं पाठयन् पठञ्च नेपालसंस्कृतविश्वविद्यालयत आचार्यकक्षां समुत्तीर्य विद्यावारिधिञ्च कृतवान्। तदनु नेपालसंस्कृतविश्वविद्यालयस्य प्राध्यापकपदस्य प्रतिस्पर्धायां विजयं लब्ध्वा प्राध्यापकश्च जातः।

छात्रजीवनादेव डा. कट्टेलः सामाजिक-राजनीतिक-साहित्यिकगिविधिषु सक्रियो भूत्वा समागतः, अद्यपर्यन्तं स संस्कृतभाषासाहित्यसंस्कृतिसंरक्षणाय, संवर्द्धनाय च सक्रियो दरीदृश्यते। छात्रजीवनादेव सः 'संस्कृतच्छात्रसंघः २००४' इत्यस्य पुनः संरचनायां पुनर्जीवनाय च सक्रियो जातः। तदनु ह्यनेन वाल्मीकिविद्यापीठस्य छात्रसङ्घस्य (स्ववियू २०४०-०४२) निर्वाचनं विजित्य सचिवपदे स्थित्वानेकानि कार्याणि व्यधायिषत। कार्यसम्पादनावसरे सर्वकारेण अनेकावरोधान् कुर्वता अल्पावधिकेन दीर्घावधिकरूपेण च कारागारेऽपि पातितोऽयम्। अनेकेषु प्रजातान्त्रिकान्दोलनेषु चास्य संलग्नता दृश्यते।

प्रा.डा. कट्टेलः अनेकासु समितिषु स्थित्वाऽनेकानि कार्याणि सम्पादितवान्। स तीनधारासंस्कृतछात्रावास-शतवार्षिकसमित्यां (विसं २०४२) सचिवो भूत्वा कार्याणि समकरोत्। तदवसरे स्थापितं शिलापत्रमधुनापि तत्रैव विलसति। तथैव स 'जयतु संस्कृतम् आन्दोलन २००४ स्वर्णमहोत्सव-समारोह - आयोजक-समित्यां (वैक्रमाब्दस्य २०५४ वर्षे) सर्वसम्मत्या सचिवपदे नियुक्तः आसीत्। तदवसरे विविधसाप्ताहिककार्यक्रमाणां, वार्षिककार्यक्रमाणाञ्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादने चानेन महत्त्वपूर्णा भूमिका निर्व्यूढा। अनया समित्या स्मारिका प्रकाशिता, स्मारकस्तम्भः स्थापितः, जयतु संस्कृतमिति स्थायिसंस्था च सङ्घटिता।

एवञ्चानेन नेपालसंस्कृत-विश्वविद्यालयस्य प्राध्यापकसङ्घस्य केन्द्रीयसमितेरध्यक्षपदे स्थित्वा च संस्कृतवाङ्मयस्य विकासाय अनेकानि कार्याणि सम्पादितानि। तथैव नेपालप्राध्यापकसङ्घस्य केन्द्रीयसदस्यपदे स्थित्वा च नेपालस्य विश्वविद्यालयानां स्थितिस्थापनाय अनेके प्रयासाः विहिताः। एवञ्चानेन नेपालसंस्कृतविश्वविद्यालयस्य सभासद् भूत्वा, प्राज्ञिकपरिषदि च स्थित्वा संस्कृतस्य पक्षपोषणाय चानेकानि कार्याणि विहितानि। अथ च नेपालसर्वकारस्य पाठ्यक्रमविकासकेन्द्रस्य नेपालिविषयसमित्यां स्थित्वा तद्विषयस्य पाठ्यक्रम-पाठ्यपुस्तकसम्पादने कतिपयावसरे संस्कृतस्य पठ्यक्रमसम्पादने च सोऽयं कट्टेलः सक्रियो जातः।

जयतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनायाम्, अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाणा अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रणयिनो जानन्त्येव।

प्रा.डा.कट्टेलमहाभागेन नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते। तद्वद् कट्टेलस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति। गोरखापत्रे चायं संस्कृतभाषापृष्ठसंयोजकसम्पादकत्वेन विराजते। इतः पूर्वसमयेऽपि 'नेपाली कथा र उपन्यास : एक अनुशीलन' (वि.सं २०७३), 'उपन्यास समीक्षा' (वि.सं. २०७८), 'संस्कृतकाव्यसिद्धान्त-समीक्षा' (वि.सं.२०७८) 'पण्डित दधिराम पौडेलका व्याकरणात्मक कृतिको अध्ययन' .(वि.सं.२०७९), 'कवि पण्डित गायत्री गणेप्रसाद अर्यालका कृतिहरूको समीक्षात्मक अध्ययन' (२०८१ चैत्रः, रामनवमी) इति पुस्तकानि प्रकाशितानि सन्ति। अन्यान्यनेकानि दशाधिकानि पुस्तकानि चानेन सम्पादितानि सन्ति। तानि पुस्तकानि नेपालप्रज्ञाप्रतिष्ठानतः, साझाप्रकाशनतः, जयतु संस्कृतम् इति संस्थातश्च प्रकाशितानि विलोक्यन्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति। रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति। प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो वर्तते। संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते। पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते। संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता। अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् अस्ति । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति।

नेपाले संस्कृतभाषायां नारीणां रचना नैव दृश्यते। अतो नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायामग्रे आगच्छन्तु इति धिया तासां प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति। अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति। अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृतरचनायां तासां प्रोत्साहनाय नारीप्रतिभापुरस्कारञ्च स्थापितवती। अन्या च उद्यमशीला इन्दिरासापकोटा एकलक्षं दत्वा नारीप्रतिभायाः कृतेऽक्षयकोषस्य स्थापनां कृतवती । तस्य यथोचितव्यवस्था च विहितास्ति। नेपाल- संकृत विश्वविद्यालयस्य शिक्षणसेवायामनेकाः विदुष्यः सन्ति परन्तु ताः काव्यरचनायां नैव प्रवृत्ताः सन्ति। अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति।

अस्य खण्डकाव्यस्य प्रकाशने गोरखाजनपदे लब्धजन्मा अद्यतनसमये क्यानाडादेशे क्रियाशीलः योगाचार्यः प्रशिक्षकश्च श्रीमती शोभाभट्टः उपप्रा.श्रीमोदनाथखनालः आर्थिकसहयोगं कृतवन्तौ स्तः। एताभ्यां मनस्विभ्यां दानवीराभ्यां दम्पतिभ्याञ्च च जयतु संस्कृतं संस्था हार्दं धन्यवादं कृतज्ञताञ्च ज्ञापयति। अस्य पुस्तकस्य प्रकाशनसौजन्यकर्ता मोदनाथखनालः गोरखाजनपदस्य तान्द्राङ्ग्रामे लक्ष्मीदेवी-बुद्धिविलासखनालयोः पुत्रत्वेन वैक्रमाब्दस्य २०२५।३।२८ दिनाङ्के समजनि। बाल्ये पितुः सकासाद्, तदनन्तरं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तान्द्राङ्गसंस्कृतमाध्यमिकविद्यालये, तदनु वाल्मीकिविद्यापीठे समधीत्य महेन्द्रसंस्कृतविश्वविद्यालयतः सर्वदर्शने स आचार्यपरीक्षां समुत्तीर्णवान्। एवञ्च त्रिभुवनविश्वविद्यालयतः अर्थशास्त्रविषये स्नातकोत्तरस्तरञ्च उत्तीर्णवान् खनालः। तदनु २०५३ तः २०७१ पर्यन्तं उपप्राध्यापकत्वेन नेपालसंस्कृतविश्वविद्यालये १७ वर्षपर्यन्तं सर्वदर्शनविषयमध्यापयत्। अध्ययनकाले एव स छात्रप्रतिनिधित्वेन विश्वविद्यालयसभायाः सदस्यो जातः। स नेपालप्राध्यापकसङ्घस्य वाल्मीकिविद्यापीठस्य सचिवः, ने.सं.वि.प्रा.सं.-केन्द्रीयसमितेः कोषाध्यक्षश्च जातः। स ने.प्र.प्रा.सङ्घस्य सचिवो भूत्वापि कार्यं सम्पादयामास।

अनेन समसामयिक-राजनीतिविषये, समाजिकविषये च त्रिंशताधिका आलेखा व्यलेखि। ते च आलेखाः विविधपत्रिकासु प्रकाशिताः सन्ति। एवञ्च २०६२ वर्षस्य 'राजनीतिकडायरी', 'मानिस किन विदेसिन्छन्' (२०८२) इति द्वे पुस्तके प्रकाशिते स्तः। वर्तमानसमये स क्यानाडादेशस्य अलवर्टाप्रान्ते स्थित्वा पौरस्त्यदर्शनं, योगदर्शनं च पाठयन्नस्ति। we and the world centre नामिकायाः संस्थायाः संस्थापकः, गुरुकुल- नेपालीपाठशालायाश्च संस्थापको भूत्वा नेपालीचेतनायाः जागरणे विस्तारे च अनेकानि कार्याणि कुर्वन्नस्ति। छात्रजीवन एव स वैक्रमाब्दस्य २०४२ वर्षतः नेपालविद्यार्थिसङ्घे विद्यालयस्य अध्यक्षत्वेन संलग्नो जातः, वाल्मीकिविद्यापीठे कदा सचिवो कदा अध्यक्षो भूत्वा, अथ च अन्येषु विद्यापीठेषु, ने.सं.वि.-केन्द्रीयसमितौ च स्थित्वा कार्यमकारि।

अस्य सहमर्धिणी शोभाभट्ट च गोरखाजनपदस्य भीमसेनथापानगरपालिकायाः तारादेवीकृष्णप्रसादभट्टयोः पुत्रीत्वेन समजनि। सा ग्रामे एव माध्यमिकविद्यालयस्य शिक्षां गृहीत्वा त्रि.वि.नर्सिङ्गक्याम्पस इति महाविद्यालये समधीत्य पूर्वाञ्चलविश्वविद्यालयतः स्नातकं, बेलायतस्य लण्डनतः स्नातकोत्तरतहश्च समुत्तीर्णा। अनया आङ्गसाहित्ये च स्तातकोत्तरपरीक्षा समुत्तीर्णा। लण्डननगरे एव कार्यानुभवश्च गृहीता। तदनु क्यानाडादेशं समागत्य सन् २०१३ तः पञ्जीकृतपरिचारिकासेवायां संलग्ना अस्ति। इयञ्च साहित्यसाधिकास्ति, अस्याश्च 'नियाल्दै जाँदा' इति उपन्यासः प्रकाशितोऽस्ति। तौ दम्पतिवरौ धन्यवादौ स्तः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तथैव अस्य खण्डकाव्यस्य सम्पादनाय, परिष्काराय च संस्थायाः उपाध्यक्षाय कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय उपप्रा.सुदर्शनेपालाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि। अस्य खण्डकाव्यस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रयणिनो धन्यवादार्हाः। जयतु संस्कृतम् ।

अध्यक्षः

डा. बद्रीपोखेलः
जयतु संस्कृतम्,
अनामनगरम्, काष्ठमण्डपम्- ३२।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाशंषा

राष्ट्रकविः माधवप्रसाद-घिमिरे

१. पूर्वापरौ प्रसृतस्य हिमालयस्य क्रोडे प्राचीनकालादेव महर्षियस्तपः तप्त्वा वैदिकमन्त्रान् अधिजग्मुः। विविधदिशाविदिशासु प्रसृतान् वेदमन्त्रान् दमौलीक्षेत्रजो पाराशर्यः कृष्णद्वैपायनो व्यासश्चतुर्धा विव्यास। वेदाङ्गानि प्रसृतानि। अष्टादश पुराणानि खलु रचितानि। पाणिनिः हिमवद्देशे समागत्य तपस्तप्त्वा महेश्वरात् व्याकरणसूत्राणि अधिजगाम। अस्मिन्नेव हिमाह्ववर्षे नेपालराष्ट्रे महर्षिः यज्ञवल्क्यः शुक्लवेदं प्राप्तवान्, स एव मिथिलाधीशं राजर्षिजनकं ब्रह्मविद्यां प्रोवाच। लिच्छविकाले च अनेकानि ग्रन्थरत्नानि शिलापत्राणि वा विलिखितानि। मल्लकाले च अनेकनाटककाव्यकृतीनां रचना सञ्जाता। अस्मिन्नेव आर्यावर्ते भास-कविकालिदास-माघकविभिः बहूनि काव्यरत्नानि रचितानि। शक्तिवल्लभ-सुकृतिदत्तपन्त-छविदत्तसूरि-पूर्णप्रसादब्राह्मण-भरतराज-घिमिरे-माधवभट्टराईप्रभृतिभिर्नेपाले संस्कृतस्य काव्यायात्राऽतिवाहिता।

२. अस्यामेव परम्परायाम् एकविंशतिशताब्द्यां सुरभारतीपूजकः, संस्कृतवाङ्मयस्य सेवकः, गोरखाजनपदे लब्धजन्मा, नवराजकट्टेलः स्वजनन्याः दिवङ्गत्या उत्थितकरुणाशोकसागरेण मातृवियोगजन्यदुःखेन आघातितः। तासामश्रुधाराणां सङ्कलनं विधाय आशौचस्य दशदिनाभ्यन्तरे एतत्काव्यं व्यरचयत्। पुत्रस्य कर्तव्यं यत् मातापितरौ देववद् आजीवनं सर्वतो भावेन सेवनीयौ, पालनीयौ च। पञ्चत्वेऽपि हव्यकव्यादिकं विधाय ऋणत्रयं मोचनीयमिति। तथैव 'पुंनामकात् नरकात् त्रायते इति पुत्रः' इति शास्त्रवचनं प्रसिद्धमेव।

३. मातुः पितुः स्वसन्ततिं प्रति यद् दायित्वं विद्यते तद् महत्त्वपूर्णं प्रतिभाति, तथैव सन्ततेरपि मातरं पितरं प्रति गुरुतरं दायित्वं वरीवर्ति। अपि च पारम्पर्येण व्यवहारेण च तयोः सम्बन्धः स्थापितः। पुत्रस्य कर्तव्यं न केवलम् अन्त्येष्टिक्रियासम्पादनम् अपितु पुत्रेण मातुः पितुः कीर्तिस्थापनं कीर्तिवर्द्धनञ्च महता यत्नेन करणीयम्। नवराजकट्टेलवरेण स्वस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतिमाध्यमेन पित्रोः कीर्तिस्थापितं बर्द्धितञ्च । काव्येदं न प्रौढिमयुक्तं परन्तु भावप्रवाहयुतं, मातुः स्मरणे भक्तिपुष्पोपहाररूपम् । संस्कृतवाङ्मये नवप्रतिभायाः नवराजकट्टेलवरस्य काव्ययात्रायाः सफलतां कामये ।

जयतु संस्कृतम् ।
२०७२ वैक्रमाब्दस्य, ज्येष्ठमासः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रचनाकारस्योपोद्घातम्

इदं मातृशतकं शोककाव्यं भवतः हस्तेऽस्ति। नाहं संस्कृतस्य विद्वद्धौरेयः, तथापि संस्कृतस्य पूजायै सम्मानाय च इदं काव्यमरचयम्। अहं संस्कृतस्य छात्रः अस्मि। बाल्यकाले नेपालवेदविद्याश्रमे स्थित्वा (२०३०-२०३४) संस्कृतं समधीतम्। तदनु रानीपोखरीसंस्कृत-माध्यमिकविद्यालये समागत्य पठित्वा मध्यमा परीक्षा समुत्तीर्णा। तदनु वाल्मीकिविद्यापीठं समागत्य त्रिभुनविश्वविद्यालयतः व्याकरणविषये शास्त्रीकक्षा (२०४४) समुत्तीर्णा, पश्चात् आचार्यकक्षा च उत्तीर्णा। अतः संस्कृतस्य छात्रो भूत्वापि संस्कृतस्य सेवा नैव कृता, पठनस्य, लेखनस्य, सृजनायाश्च क्षमता नैव विकसिता। नेपालीविषये स्नातकोत्तरं विधाय नेपालीभाषासाहित्यक्षेत्रे त्रिंशद् वर्षाणि यावत् सेवा विहिता। अतः संस्कृतं विस्मृतं, संवदनस्य लेखनस्य च अभ्यासो गतः, संस्कृतशून्यमिवाभवमहम्।

मम माता २०७१ वैक्रमाब्दस्य चैत्रमासस्य २० दिनाङ्के मध्यरात्रौ दिवङ्गता। धर्मशास्त्रस्य व्यवस्थानुसारं त्रयोदश दिनपर्यन्तं दशगात्रविधौ संलग्नः। वयमष्टौ भ्रातरः। आदिनं अनेके स्वजनाः मिलितुं समागच्छन्ति स्म। तथापि मया नव दिनाभ्यन्तरे एवैतत् काव्यं व्यलेखि। तत्रापि द्वे दिने विविधव्यवस्थायां अगच्छताम्। दशम, एकादश, द्वादश, त्रयोदश दिनेषु अनेकानि कार्यणि सम्पाद्यन्ते। न तत्र लेखनस्यावकाशः। तृतीयदिनतः नव दिनपर्यन्तं सप्त (७) दिनमेव केवलं काव्यसृजनाकार्ये संलग्नोऽहम्।

मम माता १९९० वैक्रमाब्दे गोरखाजनपदस्य मकैसिङ्गग्रामे काश्यपगोत्रीये काश्यप-आवत्सार-नैध्रुवप्रवरे घिमिरेकुले तुलसादेवी-ईश्वरीप्रसादयोः ब्राह्मणपरिवारे मध्यमपुत्रीत्वेन समजनि। नवमे (९) वर्षे एव मम पराशरगोत्रस्य पराशर-शक्ति-वशिष्ठत्रिप्रवरस्य सुपठितेन पित्रा हरिकृष्णकट्टेलवरेण साकं तस्याः विवाहो जातः, तदनु सा कट्टेलडाँडाग्रामे समागतवती। तदनु आजीवनं सा पतिगृहं पुपोष, पाराशर्यकुलं समुज्ज्वलितवती, मम कुलं अद्दीपयत्, अभूषयच्च।

मम माता (१९९०-२०७१।१२।२०) दुर्गाकुमारी एवास्यकाव्यस्य नायिकास्ति। अत्र मातृवियोगस्य विरहव्यथा प्रकटितास्ति। शोकेन, मोहेन, मातृवियोगव्यथया च मम नेत्राभ्यां यानि अश्रूणि विमोचितानि तेषामेवालेखनमत्र मया विहितमस्ति। काव्यगुणमत्रास्ति वा न, नाहं जाने, परन्तु मम हृदयस्य व्यथा अत्र प्रवहमानास्ति।

मम माता यदा वैवाहिकजीवने प्रविष्टा तदा नेपालस्य पर्वतखण्डे जनाः अतीवकष्टकरं जीवनं यापयन्ति स्म। तत्रापि नारीणां जीवनं असह्यकष्टदायकमासीत्। प्रतिदिनं ढिक्कीचालनं, पेषणीचालनं, प्रपाते वा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कूप्यां गत्वा जलानयनं, घासकर्तनं, गावां, महिषीणां आजानाञ्च चारणे वनगमनं, क्षेत्रकर्षणं, खननं,बीजवपनं, रोपणं, धान्यादिकर्तनं, धान्यसंवहनं इत्यादिकार्याणि कर्तव्यानि आसन्। यन्त्रवत् तेषां जीवनं चलति स्म। यात्रायाञ्च न सौकरमार्गं मिलति स्म। कुत्रचित् व्याघ्रस्य भयं, कुत्रचित् भल्लुकाना., वन्यजन्तूनाञ्च भयं भवति स्म। परन्तु जनाः जनान् सहयोगं कुर्वन्ति स्म, स्निह्यन्ति स्म, आतिथ्यं ददति स्म। केचित् गुरुङ्गाः, केचित् मगरा मम मातुः पित्रोः मित्राणि आसन्। तेषां सन्ततयः अधुनापि मम मातरं पितरं स्मरन्ति, एतादृशी हार्दिकी भावना तदासीत्। एतदेव नेपालिसमाजस्य सम्पत्तिरासीत्।

मम पिता हरिकृष्णः (१९८१-२०६३) मध्यमकक्षायाश्छात्र आसीत्। परन्तु गृहस्य समस्यायाः कारणात् रानीपोखरीसंस्कृतविद्यालये पठितुं विहाय गृहं गतः। तदनु गृहस्थजीवने प्रविष्य षष्टिवर्षाणि यावत् कृषकजीवनं यापितवान्। स्वजीवनस्य ७५ वयसि स काष्ठमण्डपं समागत्य पुत्रैः साकं जीवनमग्रे समनयत्। एतस्मिन् समये काष्ठमण्डपे अष्टौ पुत्राणाम् अष्टौ गृहाणि विनिर्मितानि आसन्। द्वे पुत्र्यौ आस्ताम्, तयोरपि गृहेऽत्रैव राजधान्यां निर्मिते स्तः। अतः पितरौ सन्तुष्टौ आस्ताम्, पुत्राणां पुत्रीणां, पुत्रवधूनाञ्च सेवया, मृदुवचसा, सम्मानेन, पौत्रपौत्रीणाञ्चोपस्थित्या च हृष्टौ सुखिनौ च आस्ताम्।

पिता २०६३ वैक्रमाब्दस्य ज्येष्ठस्यामावास्यायाम् द्वितीयदिनाङ्कस्य सन्ध्यायां ८३ वर्षे दिवङ्गतः। नेपालिभाषायां पितुः स्मरणे पितृशतकं काव्यं लिखितमासीत्। माता २०७१ वैक्रमाब्दे ८१ वर्षे पुत्राणां कुक्षौ शीर्णं शरीरं त्यक्त्वा लोकोत्तरं गतवती। मया तत्रैव मातृवियोगे दशगात्रविधौ सप्तदिनाभ्यन्तरे एव इदं मातृशतकं शोककाव्यं व्यलेखि। तदनु कार्यवसात् राष्ट्रकविना माधवप्रसादघिमिरेमहोदयन साकं सम्मीलनं समभवत्। तदा मया बालसुलभमपरिपक्वं काव्यमश्रावि। आशीर्वादस्य कृते अनुरोधो विहितः। नेपालीभाषायां तेन शुभकामना प्रकटीकृता, तदनुसारं संस्कृते समनुद्य मया पुनः संस्कृतमयी शुभकामना श्राविता, सहर्षं काव्यपरिष्कारपूर्वकं प्रकाशनाय अनुमतिश्च दत्ता। अतः दिवङ्गतं राष्ट्रकविं सश्रद्धं पौनःपुन्यं स्मृत्वा नौमि च।

अत्र अष्टादश विषयक्षेत्राणि समाविष्टानि सन्ति। परन्तु सर्वत्रैव मातृविगोजन्यव्याकुलतायाः शोकस्य, वियोगस्य भावना सर्वत्र परिलसति। अत्र १. माताद्य स्वर्गमगच्छत्, २. केन्द्रधूश्चात्र नष्टा ३. वयमपि सुता वत्सला गौरिव सा ४. गेहधर्मे प्रविष्टा ५. घोरेऽरण्ये ६. सुगगनपथात् देवगेहं प्रयाता ७. ब्रह्मनाले पवित्रे ८. चुम्बिता मेदिनी च ९. दाहकार्यं समाप्य, १०. गोर्खाग्रामे, ११. शून्यं कोष्ठम्, १२. सृष्टिशून्यं तदा स्यात्, १३. जननि ! मध्यरात्रौ क्व याता, १४. वेदना नैव पृष्टा, १५. स्वर्गता मेऽद्य माता, १६. अस्माभिस्ते प्रियतरवपुर्भष्मयित्वा विनष्टम्, १७. मम मातरं सुजननीं 'कुक्षौ प्रभो स्थापय' १८. शोके निमग्ना वयम् इति अष्टादश शीर्षकेषु शोकजा भावना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकटीकृतास्ति ।

अत्र अधिकंशश्लोकाः मन्दाक्रान्ताच्छन्दसि, स्वल्पानि पद्यरत्नानि शार्दूलविक्रीडितछन्दसि लिखितानि सन्ति । कतिपयस्थलेषु भाषायाः छन्दसश्च परिष्कारो न स्यात्, अलङ्कार-रस-ध्वनीनां प्रयोगेऽप्यत्र विचारो नैव कृतः स्यात् । परन्तु स्वाभाविकरूपेणात्र अलङ्कारादीनां विन्यासोऽस्ति चेत् शोभनमेव, न कुत्रापि कृत्रिमप्रयासो विहितः । परन्तु शब्दालङ्कारस्यार्थलङ्कारस्य च अन्वेषणं विधीयते चेत् स्वल्पानि अलङ्काराणि अनुस्यूतानि दृश्यन्ते । अङ्गीरसत्वेन शोकस्थायिभावो करुणरसः परिलसत्यत्र । पूर्वमपि लघ्वी कविता तु लिखितासीत्, परन्तु प्रथमञ्चेदं प्रबन्धकाव्यम् । अतोऽस्यकाव्यस्याप्रौढता स्वाभाविकी इति मदीया धारणास्ति ।

काव्यलेखने परिष्करणे च मम गुरुः प्रा.डा.विष्णुप्रसाददेवकोटा सदैव प्रीणाति, काव्यं विलोकयन् प्रेरयति, एतस्य आशीर्वादस्य कृते कृतज्ञतां व्याहरामि । एवमेव छात्रजीवनादेव संस्कृतभाषायां लेखने प्रेरणां ददाति स्म मम गुरुः प्रा. रामहरिदाहालः, अतः श्रीमन् गुरुवरोऽपि, अस्य काव्यस्य परिष्करणेऽपि सहयोगो दत्तवान्, एतस्य कृते गुरुवराय धन्यवादं समर्पयामि । एवञ्च प्रा.डा. मुकुन्दप्रसादलामिछाने शिष्यकल्पाय विद्वद्धौरेयाय, सुदर्शननेपालमित्राय च धन्यवादं वच्मि । जयतु संस्कृतमिति संस्थायाः अध्यक्षवराय श्रीमते डा. बद्रीपोखेलमहाभागाय च धन्यवादं ददामि । काव्यलेखने, प्रकाशने च सहयोगशीलाय मित्राय सपत्नीकाय मोदनाथखनालभ्रातृकल्पाय धन्यवादं व्याहरामि । सुशीलायै धर्मपत्न्यै, परिवारजनेभ्यश्च साधुवादं विज्ञापयामि । काव्यलेखने प्रकाशने च संहतेभ्यः सर्वेभ्यश्च धन्यवादं ददामि ।

जयतु संस्कृतम् ।

प्रा.डा. नवराजकट्टेलः
काष्ठमण्डप-महानगरपालिका - ७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची

क) डा. बद्रीपोखेलः - प्रकाशकीयम्	६
ख) राष्ट्रकविः माधवप्रसाद-घिमिरे - शुभाशंषा	१५
ग) प्रा. डा. नवराजकट्टेलः - रचनाकारस्योपोद्घातम्	१७
१. माताद्य स्वर्गमगच्छत्	२१
२. केन्द्रधूश्चात्र नष्टा	२१
३. वयमपि सुता वत्सला गौरिव सा	२२
४. गेहधर्मे प्रविष्टा	२३
५. घोरेऽरण्ये	२४
६. सुगगनपथात् देवगेहं प्रयाता	२५
७. ब्रह्मनाले पवित्रे	२६
८. चुम्बिता मेदिनी च	२७
९. दाहकार्यं समाप्य	२८
१०. गोर्खाग्रामे	२९
११. शून्यं कोष्ठम्	३०
१२. सृष्टिशून्यं तदा स्यात्	३१
१३. जननि ! मध्यरात्रौ क्व याता	३२
१४. वेदना नैव पृष्टा	३३
१५. स्वर्गता मेऽद्य माता	३४
१६. अस्माभिस्ते प्रियतरवपुर्भष्मयित्वा विनष्टम	३५
१७. मम मातरं सुजननीं 'कुक्षौ प्रभो स्थापय'	३५
१८. शोके निमग्ना वयम्	३६

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मतृशतकं शोककाव्यम्

१. माताद्य स्वर्गमगच्छत्

अस्मन्माता धवलगगनान् निर्गता स्वर्गता च
वृद्धाऽसीद्या ह्यहिकरवयो हायने वै प्रपन्ना ॥
सर्वान् पुत्रान् विविधविकटान् मोचयित्वा ररक्ष
स्नेहं कृत्वा गजमितसुतान् दुग्धधारैः पुपोष ॥१॥

कष्टं सोढ्वा मुदितमनसाऽलालयद् जातकान् सा
पुत्र्यौ ह्यास्तां हृदय-कुसुमं वर्धिते पाठिते च ।
दुर्गाख्या सा प्रियतरसुतान् शिक्षितान् स्नातकान् च
कृत्वा, मुग्धा ह्यतिशयसुखं प्रीणिता मोदमाना ॥२॥

यावच्छष्टिर्वयसि च तया पर्वते पश्चिमे च
क्षेत्रं कृत्वा बहुविधरसैरन्नभाण्डं प्रपूर्य ।
गेहे, गोष्ठे बहुविधपशून् पालयित्वा सुखेन
पुण्यं कृत्वा कतिपयमखैर्गेह-धर्मं ररक्ष ॥३॥

वार्धक्ये सा स्वतनुजबलात् राजधानीं समायात्
स्थित्वा, भुक्त्वा तनयनिलये मोदमाना धवेन ।
साकं, सेयं बहुपरिजनैः पुत्रपौत्रैस्सश्रद्धं,
धर्मं चक्रे ह्युडुप इव खे चन्द्रमाश्चन्द्रिकावत् ॥४॥

वर्षात् पूर्वं प्रियतमपतिर्निर्गतः स्वर्गतश्च
ह्येका माता तनयसहिता राजधानीमतिष्ठत् ।
सन्तुष्ट्या सा स्वतनयगृहान् साधु तस्थौ क्रमेण
सन्तुष्टा सा हरिहरवशात् चाद्य स्वर्गाय याता ॥५॥

२. केन्द्रधूश्चात्र नष्टा

शोके मग्ना अखिलतनया नेत्रवार्भिश्च क्लिन्नाः
कारुण्यैर्यत् विगलितवपुश्शक्तिसामर्थ्यहीनाः ।
केन्द्रं याऽसीत् शिथिलकमभूत् केन्द्रधूश्चात्र नष्टा
छिन्ना भिन्ना इव समभवन् दैवदण्डप्रहारैः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माताऽऽसीत् पिप्पलतरुरहो मूलवृक्षः समेषां
नीडो ह्यासीत् खग इव वयं प्राप्तदेहाः ततः स्मः ।
वृक्षाभावात् वसतिरभवन्नष्टभाग्याः ततः स्मः
हंहो दण्डो विकठिनतरो दैवदण्डो बभूव ॥७॥

वृक्षच्छाया-विरहिततया घर्मतप्ता वयं वै
तस्या लोपात् जलविरहितो खिद्यमानेव पृथ्वी ।
'आपो माता' सकलभुवने जीवनं जीवहेतु-
'रापो न स्युर्यदि च भुवने जीवनं स्यात् कथञ्च ॥८॥

वृक्षो मूलं प्रकृतिरचनायां, च जीवस्य हेतुः
सृष्टेराद्ये प्रकृतिसुपथे वृक्ष आसीद्धरायाम् ।
'सोमो राजा' द्विजकुलगृहे कथ्यते पठ्यते च
'सोमं न स्यात्' द्विजकुलचये ? जीवनं केन तत्स्यात् ॥९॥

मूलाद् भूता वयमपि ततस्तर्कयामस्तरोर्वै
सृष्टेश्शक्तिः कथमपि तरोर्दैवयोगात् प्रभूता ।
अस्मन्नीडं न भवति तदा कश्च सारो ह्यसारे
खिन्ना भिन्ना शिशव इव वै शोकमग्ना भवेम ॥१०॥

३. वयमपि सुता वत्सला गौरिव सा

माता मे या शिखरिशिखरे चारुघासं विचित्य
गच्छन्ती वै वनमुपवनं तत्र गोभिस्समेता ।
ऋक्षै र्व्याघ्रैः कतिपयदिने त्रासिता ताडिता च
न स्यान्माता मधुरवचना जीवनं मे कथं स्यात् ॥११॥

झञ्झावातैः कतिपयदिने ताडिता घातिता च
तोयासारैः कठिनदिवसे मेघघातैर्हता सा ।
गच्छन्ती सा वनमुपवनं ह्यश्रुधारैः प्रताड्य
नो चेन्माता मधुरवदना जीवनं मे कथं स्यात् ? ॥१२॥

क्षेत्रे क्षेत्रे नयति बहुशः शस्यरोपाय नित्यं
पङ्काघातैः श्लथिततनुभिर्घर्मघातैश्च तप्ता ।
स्वेदैः क्लिन्ना विविधसमये मेघपुष्पैश्च क्लिन्ना
क्षुत्तृड्भिः सा क्लमभुजवपुः पुष्कलं ताड्यमाना ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दत्तं खाद्यं तदपि जननी तत्र स्मृत्वा सदास्मान्
रक्षां कृत्वा पटकवसने स्थापयित्वा तदानीम् ।
चञ्च्वैवेदं वितरति तदा रात्रिकालेऽपि श्रान्त्या
प्रत्यावृत्या वयमपि सुता वत्सवत् कूर्दमानाः ॥१४॥

मातुर्गेहं भवति विधिना स्थापितं गोरखायां
कूपं वन्यं पशुपदहतं चुम्बितं मातृभावैः ।
धान्यं क्षेत्रं तव पदनुतं चुम्बितं स्वेदवार्भिः
वाञ्छा तेषां तव पदरजःस्पर्शनं लेहनञ्च ॥१५॥

मध्ये रात्रौ श्लथितवपुषाऽऽयाति माता स्ववेश्म
भुक्त्वा खाद्यं सरलविधिना मार्जयित्वा च भाण्डम् ।
स्वल्पं शेते गृहविधिवशात् जीवनं कष्टयुक्तं
व्यस्तासीत् सा शशिनि सुगते प्रातरस्ताचले च ॥१६॥

४. गेहधर्मे प्रविष्टा

माताऽऽसीन्मे द्विजकुलगृहे पण्डितस्य प्रसूता
पौरोहित्येऽपि द्विजधिमिरे ख्यातनामा बभूव ।
तिस्रः पुत्र्यः शिशव इव ता जन्मभूमिं विरेजुः
पारम्पर्यात् सुपतिवरणे गेहधर्मे प्रविष्टाः ॥१७॥

एका रेग्मीद्विजकुलगृहे घ्यालचोकाख्यग्रामे
अन्या बाला बुधजनकुले तत्र खानालवंशे ।
पाराशर्ये सुपठितकुले मध्यमा बालिका सा
व्यूढा पित्रा सरलमनसा भर्तृगेहं जगाम ॥१८॥

वर्षे चैकादश इह च सा गेहधर्मं प्रविश्य
सर्वानर्थान् स्वजनसहितैर्गेहसौख्यं सुलेभे ।
तस्मिन् काले हिमजगति वै ह्यन्धकारस्य राज्य-
मासीत् तत्राखिलतनुभृतां जङ्गतन्त्रस्य राज्यम् ॥१९॥

जेष्ठा साऽसीत् प्रथमसुवधूर्गेहधर्मं निनाय
प्रातःकालाज्जलधर इव सा गच्छति स्म प्रपाते ।
स्नात्वा, जप्त्वा जलघटयुता ह्यम्बुभाण्डं गृहीत्वा
ह्याप्त्वा गेहं ह्यनलयति सा दारुकैस्तं गृहाग्निम् ॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्जन्या सा वसतिपरितो मार्जयित्वा तथाग्रे
पश्चाद्गेहं लिपति च तदोत्थाय दुर्गेव दुर्गा ।
ब्राह्मे काले धवलगगने नेत्रनक्षत्रजालं
तस्यासीद् वै प्रकृतिघटिका कालमानस्य वित्त्यै ॥२१॥

पूजास्थानं लिपति च पिता नित्यपूजाङ्करोति
मध्ये विष्णुमथ शिवसुतं सूर्यदेवं प्रकाशम् ।
शर्वं देवीं सुविधिसहितं ह्यर्चति स्मार्थसिद्धौ
धर्मश्चापि ऋषिकुलबुधैश्चाल्यते पाल्यते स्म ॥२२॥

गोसेवा सा प्रचलति तदा तत्र ह्यातिथ्यसेवा
अग्नेः सेवा प्रभवति तदा हव्यकार्यं विशेषात् ।
पैत्र्यं कार्यं सुकुलविधिना कव्यकार्यं विशेषं
पाराशर्ये मुनिकुलबुधे एष धर्मस्तदासीत् ॥२३॥

गेहे गेहे प्रभवति तदा शङ्खघोषः सुरम्यः
घण्टाशब्दः प्रभवति सदा विप्रग्रामे च तस्मिन् ।
पौनःपुन्यं मधुरवचसा वेदवेदाङ्गशास्त्रं
पापठ्यन्ते द्विजकुलगृहे ह्यार्षधर्मे विशेषम् ॥२४॥

नित्यं रात्रौ शशिगिरिगते पेषणी चाल्यते स्म
हर्म्ये वाद्यध्वनिरिव सदा ध्वन्यते बोध्यते च ।
ढिक्कीयन्त्रे ह्युषसि शुभके धान्यकं कुट्यते स्म
पेषण्यां वा मधुरमधुरैः पिष्यते कोद्रवश्च ॥२५॥

'भक्ष्याङ् भक्ष्याङ्' इति च ध्वनिना गर्जति ढिक्कियन्त्रम्
पेषण्यां वा 'घरघर'रवै र्ध्वन्यते तन्निकेतम् ।
कूपाद् दूराज्जलमपि घटैरानयन्ति स्म नार्यः
एतद्ग्राम्यं सकलमधुरं जीवनं याप्यते स्म ॥२६॥

५. घोरेऽरण्ये

घोरेऽरण्ये वन उपवने पक्षिभिर्गम्यते च
क्रौञ्चैः शब्दैर्मधुरमधुरै र्गुञ्जनं जायते च ।
अन्विष्याभूत् मम च जननी तैस्सदा भृङ्गशब्दै-
र्गुञ्जन्ते ते मधुकरवरा वाटिकायां यतो हि ॥२७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रौद्री खोलाः 'कलकल'रवैर्गुञ्जनं रौति नित्यं
'छड्छड्' शब्दैर्दिनमनुदिनं निर्झरो गुञ्जते च ।
माता स्नानं किल कृतवती खोलिकायां प्रभाते
तस्यास्तीरे रमणनिरता साधु वर्तामहे च ॥२८॥

मार्गे मार्गेऽपि कठिनतरः प्रस्तरः पृच्छतीत्थं
'मातुः पादौ विपुलसमयात् कुत्र यातौ तदानीम् ।'
पद्यायां यत् सदपि च सदा स्वल्पखातं ब्रवीति
त्वत् का माता मम सहचरी कुत्र याता प्रभाते ॥२९॥

'ठूली' शब्दैस्परिजनजनैर्भण्यते प्रेमपूर्णं
'आमा' शब्दैस्सुशिशुसदनैस्तत्र सम्बोध्यते च ।
'मातर्मातः' प्रियतरवैर्बालका आह्वयन्ते
स्निग्धा माता नु मृदुवचसा पृच्छ्यते कुत्र याता ॥३०॥

पौत्राः स्निग्धा सकरुणतया वाहयन्त्यश्रुधाराः
रुद्धैः कण्ठैर्गलितवचसा बालकास्ते रुदन्ति ।
मातुः पार्श्वे नयनपरितो नृत्यते क्रीड्यते स्म
तेषां पृच्छा सरलजननी हेतुना केन याता ॥३१॥

६. सुगगनपथात् देवगेहं प्रयाता

पौत्राः पौत्र्यो मसृणवचसा साश्रुनेत्रं गदन्ति
'मातामह्यः सुगगनपथात् देवगेहं प्रयाताः'
इत्थं वार्तां रुदितवचनैस्साम्बुनेत्रं भणन्ति
अस्मन्माता पुनरपि च साऽऽयाति किं वा तथैव ? ॥३२॥

विद्यागेहात् गिरिरविगते केतने ते प्रविष्य-
स्मृत्वा दुर्गां रुदितवचनैः पीड्यमाना बभूवुः ।
मित्रं कस्स्यादिति च वचनैरश्रुधारं धरन्ति
अस्मिन् काले मम च हृदयं खिद्यते भिद्यते च ॥३३॥

अस्मिन् काले सुनयनपथे मातृचित्रं तनोति
अस्मिन् काले सुहृदयपथे मातृभावं प्रयाति ।
स्मृत्वा स्मृत्वा मम च जननीं ह्यश्रुधाराः पतन्ति
खाद्यं स्वापः सकलमपि तैः स्थीयते रुध्यते च ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पीडां दत्त्वा मम जननिका-गर्भवासस्तदासीत्
सोढ्वा कष्टं खलु बहुदिनं ताड्यमाना च जाता ।
सूतिं दत्त्वा कठिनकठिनैर्दुग्धपानं ददाति
पुत्रान् दृष्ट्वा ननु सुतसुखैर्मोदमाना च जाता ॥३५॥

स्नानं पानं खलु मृदुकरैस्सा शिशूनां करोति
'को खा को खा' इति च मधुरैर्वाचयित्वा तदानीम् ।
'आमा खै खै' इति च मधुरं वाक्यजातं विधाय
'एकादेशे' इति च कथया सा च पुत्रान् पपाल ॥३६॥

७. ब्रह्मनाले पवित्रे

मातुर्गात्रं चरमसमयात् वाङ्मतीतीरभागे
प्राप्तञ्चासीत् सुघनतिमिरे ब्रह्मनाले पवित्रे ।
शर्वाद् भूतं पशुपतिजलं चाऽऽस्यमध्ये प्रदत्तं
पुत्रैः पौत्रैरितरजनकैस्तैर्वधूभिस्सुताभिः ॥३७॥

शून्यं शान्तं पशुपतितटं मध्यरात्रौ तदासीत्
मन्दं मन्दं चलति च सदा वाग्वती वारिजाता ।
मन्दं मन्दं सुखदपवनो वाति शीतस्सुगन्धो
मन्दस्तारागण इह तदा ह्यम्बरे राजते च ॥३८॥

मन्दो घण्टास्वन इति तदा ध्वन्यते वातघातै-
र्मन्दं मन्दं सकरुणमृगो नेत्रमार्गं प्रयाति ।
ओंकारै र्वा मधुरवचनैर्गुञ्जिता सा धरासीत्
रामश्शब्दैर्बहुजनमुखैर्गुञ्जिता सर्वराजिः ॥३९॥

उच्चैश्शब्दैः खलु ह भणितं नाम रामस्य सत्यं
मन्दं मन्दं वचसि कथितं नाम रामस्य सत्यम् ।
रुद्धैः कण्ठैर्गलितवचनैर्नाम रामस्य सत्यं
मन्दं मन्दं सुहृदि भणितं नाम रामस्य सत्यम् ॥४०॥

अष्टौ पुत्रा जननिशवकं स्कन्धभागे निधाय
स्मृत्वा देवं ह्यपि च जननीं हिण्डमानास्तदासन् ।
स्तब्धं शून्यं पशुपतितटं राजते रामगाथा
तस्मिन् काले परिजनकुलैस्संवृतश्शावदेहः ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्यां रात्रौ पशुपतितटे सा चिता निर्मितासीत्
सर्वेषां वै कथयति कथां भीमभष्मेश्वरस्सः ।
दग्धो देहो प्रभवति सदा स्वप्नवज्जीवनञ्च
सर्वं भूतं परममहिते लीयमानं ह्यभूच्च ॥४२॥

वह्निं दत्वा जननिशवके भस्मयित्वा च तत्त्वं
शवो दीप्तो गतिमयमनश्शोकमग्नं तदासीत् ।
मूर्त्तो दृष्टश्शव इति तदा ऽगाच्च तद्भूतसंघम्
नृत्यन् नृत्यन् सकलदहनो रक्तजिह्वां करोति ॥४३॥

आकाशे वै सरलगतितो धूमरेखा ह्यटन्ति
ह्यस्मिन् काले पशुपतितटे मन्दिरे मन्दिरे च ।
मन्दं मन्दं सरलगतितस्तत्र कैलाशमार्गे
भ्रामं भ्रामं गगनसरणेर्हिण्डते चाग्निधूमः ॥४४॥

ज्ञानं दत्वा दहननरकस्तप्तजिह्वां प्रसार्य
सत्यं सत्यं जननमरणे को विनष्टुं समर्थः ।
पापं धर्मः खलु सुरपथे नीयते प्राप्यते च
दुष्टं कृत्यं पवनदहनो भस्मसाद् वै करोति ॥४५॥

कामाः क्रोधाः खलु मलिनतां धारयन्ते विचित्रं
लोभा मोहाः खलु कुपथतां धारयन्ते विचित्रम् ।
मात्सर्यैस्तैस्कतिपयनरा नीयमाना भवन्ति
एतान् सर्वान् दहति पवनश्चाग्निमूलं हि विश्वम् ॥४६॥

८. चुम्बिता मेदिनी च

रात्रिर्रिक्ता दिनकरकरैश्चुम्बिता मेदिनी च
अस्तं यातेऽथ च शशिकरे शीतलो याति वायुः ।
भृङ्गैश्शब्दैर्नु निजकलया चन्द्रमाश्चुम्बिता च
स्मारं स्मारं परिजनगणैः संस्मृता दिव्यमाता ॥४७॥

स्नातुं तोये रविरपि तदा याति तत्र प्रभाते
खिन्नं मत्वा रविरपि तदा साश्रुधारः प्रयातः ।
आकाशे वै शशधरवरः खिन्नभावैः प्रयाति
नक्षत्राणामपि मलिनतां याति दुःखप्रसूताम् ॥४८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्तं याते शशिनि च तदा सूदितें वै प्रभाते
तस्मिन् काले परिचितजना आगता दर्शनाय ।
म्लानं म्लानं परिचितजनोऽधोमुखं सन्दधानो
मित्राण्यासन् व्यथितहृदया आगता बान्धवाश्च ॥४९॥

अस्तं याते ह्युडुपसुगणे पक्षिणो वै तदानीं
नीडं त्यक्त्वा सुतरुविवरं निर्गता मन्दिरे च ।
दृष्ट्वा मृत्युं हृदयदहनात् खिद्यमानाश्च जाता
दुःखं दृष्ट्वा मम मनसि ते खिन्नभावा अभूवन् ॥५०॥

पुष्पे मासे मुदितहृदये ह्युत्सवं मानयन्ति
रम्यं दृष्ट्वा कुसुमितवनं कूजनैर्नर्तयन्ति ।
कूहूकारं सुघनविपिने गीतगानं विहाय
वृक्षे शब्दान् न खलु मधुरान् कोकिलो रौति चेह ।५१।

९. दाहकार्यं समाप्य

दृष्टे सूर्ये वयमपि तदा दाहकार्यं समाप्य
प्रक्षाल्यैतच्छवशमनकं ह्यम्बुधारां प्रवाह्य ।
क्षौरं कृत्वा कुलपरिजनात् पिण्डदानं विधाय
स्नानं कृत्वा सुतपरिजनै र्ह्यञ्जलिं वै प्रदाय ॥५३॥

पत्न्यः सर्वाः कति च समयात् गेहमार्गे गतास्ता
आसन् पौत्राः पशुपतितटे सेचनं तैर्विधाय ।
अग्निं मार्गे ज्वलनमपि तैः कारयित्वा सधूपं
गेहं याताः स्वजनसहिताः यानमारुह्य नैजम् ॥५४॥

याताः सर्वे च 'मनमइजू' ग्रामगेहे विशेषे
पौत्राः पत्न्यश्च 'मनमइजू' हर्म्यकोष्ठं विरेजुः ।
अस्मिन् गेहे मम च जननी द्वादशं वर्षकाणि
अस्मिन् हर्म्ये मम सुजनकः पञ्चवर्षं ह्युवास ॥५५॥

सौम्यं रम्यं सुगृहमधुना शून्यशून्यं च जातं
बालैश्शब्दैः स्वसुतवनिताभिस्सदा सेवितञ्च ।
यातायातैर्भ्रमणकुशलैः पुत्रपौत्रैः तथान्यै-
रस्मन्मातुश्चरणकमलं प्रीतिमद्भिरसेवि ॥५६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कोष्ठं शून्यं गृहमपि तथा रिक्तदीपश्च जातः
पत्रं न स्यात् तरुरुचिरता रिक्तगोष्ठं न्विवासीत् ।
मातुर्मृत्यौ ह्यखिलतनया ह्यन्धकारे निमग्ना
एते तस्माद् व्यथितहृदया ह्यश्रुधारैश्च क्लिन्नाः ॥५७॥

१०. गोर्खाग्रामे

गोरक्षाख्ये प्रकृतिखचिते तत्र कट्टेलग्रामे
स्थित्वा नित्यं त्रिशतमपि वै तत्र पूर्वैः स्थितं यत् ।
गोष्ठं वन्यं नु कृषिकरणं चाम्बुस्रोतो विचार्य
तेषां रम्या वसतिरभवत् विप्रग्रामश्च ख्यातः ॥५८॥

क्षेत्रं कुल्यं जलमपि तदा तैर्विचार्यैव पूर्वं
मार्गं कूपं सकलमपि तैश्चारुघासं विचार्य ।
काष्ठैर्वंशैः कतिपयतृणै (खरै) श्छादयित्वा गृहाणि
मृत्पाषाणैर्भवनमपि तैर्गोमयैर्निर्मितञ्च ॥५९॥

कालीदेव्याश्चरणकमले ब्राह्मणानां च वेश्म
आसीत् ग्रामः सरलमनसाऽपौरुषेयं विचिन्त्य ।
गोरक्षं तं विमलमनसा पूजयामास तत्र
तेषामासीत् सरलमपि तत् जीवनं स्नेहपूर्णम् ॥६०॥

चिन्ता नासीत् धनजनगृहेष्वीश्वरे भक्तिरासीत्
आलस्यं नो नु कृषिकरणे कर्षणे तत्र क्षेत्रम् ।
गोसेवायां प्रकृति-कृतितो हव्यकव्ये तथैव
तोषं कृत्वा द्विजमणिकुलं गोरखायां रराज ॥६१॥

अस्मिन् ग्रामेऽथ शिशुसमये जीवनं धन्यमासीत्
मातुः पार्श्वे परिजनकरे खेलनं कूर्दनञ्च ।
भ्रामं भ्रामं शिखरिशिखरे कूर्दनं वै विधाय
क्रीडं क्रीडं मम च समयो बाल्यकालश्च यातः ॥६२॥

गाश्चाजादीन् शिखरिशिखरे चारयन् चारुघासं
मेषादीन् वै वनमुपवने चारयित्वा सहर्षम् ।
बाल्यं कालं प्रकृतकृतितः सौख्यपूर्णञ्च जातं
स्मृत्वा प्रीत्या सरलमपि तज्जीवनं स्नेहपूर्णम् ॥६३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मृत्वाऽरण्यं जलमपि तदा निर्झरझर्झरैर्वा
वन्यं पत्रं मधुरमधुरं कट्फलं जालिका च ।
यज्ञाङ्गं, धातकविसुरसं पुष्पपत्रं विशेषं
'भक्याम्लो' वै शिशुसुकृतये 'गोलकाँक्री' तदासीत् ॥६४॥[1]

भक्ष्यन्ते वै शिशुपरिजनैर्बालभावं विचित्रं
स्वादिष्ठं वै सुकदलिदलं चेक्षुदण्डं विशेषम् ।
चूतं वाऽऽम्रं मृदुमधुफलं ह्यम्बकं नागरङ्गं
इर्वालुर्वा बदरफलकं तत्र चिञ्चाविशेषम् ॥६५॥[2]

वाक्युद्धं वा विविधसमये 'दण्डघातं' तदासीत्[3]
बाल्ये काले सुसखिसहितं चादिनं क्रीड्यते स्म ।
'लुक्कामारी' कति च समये 'ह्म्बु-क्रीडां' वितन्वन्
'गोयुद्धं' तद् भवति भुवने कूर्दनं नर्तनञ्च ॥६६॥

कृत्वा हासं खलु सखिदलैः तत्र पाषाणखण्डैः
'व्याघ्राऽऽचालं' झटिति मनसा 'बुद्धिचालं' तथैव ।
क्रीडन् यातो मधु-र-समयः कन्दुकं वै ह्यनेकं
सौख्यं स्मृत्वा ननु रसमयं जीवनं शावकस्य ॥६७॥

११. शून्यं कोष्ठम्

शून्यं कोष्ठं मम च जननी निर्गता स्वर्गता च
गेहं शून्यं नु भुवनतलं शून्य-शून्यञ्च जातम् ।
स्वर्गे पान्थे श्लथितमपि किं घर्मतप्तेऽतिदूरे
रात्रेर्मध्ये त्वरितगतितो नेह याता क्व माता ॥६८॥

---

१. यज्ञाङ्गं - डुम्री । धातक - धँगेरी ।
२. इर्वालु : काँक्रो । चिञ्चा : इमिलि,
३. दण्डघातं -दन्डीबीयो। जालिका-ऐंसेलु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गच्छन्ती वा वससि गगने पद्धतौ वा वने वा
धावन्ती वा विकटविपिने ह्यम्बुमार्गे विमार्गे ।
हैमे मार्गे शिखरिशिखरे कुत्र पादौ हि धत्से
भुक्तं पीतं ह्यशनवसनं लब्धसौख्यासि किं त्वम् ? ॥६९॥

स्वर्गादस्मान् भुवनमपि किं लोकसे किं न किञ्चित्
स्वर्गान्मातः ? ननु सुतगृहं लोकसे वा न किञ्चित् ।
स्वर्गादम्बे मम सुखततिर्दृश्यते वा न किञ्चित्
आशीर्वादान् वितरसि न वा मादृशेभ्योऽङ्गजेभ्यः ॥७०॥

स्वर्गे मातर्हरिहयसभा दृश्यते गम्यते वा
स्वर्गे मातर्वनमुपवनं नन्दनं कीदृशं तत् ।
रौक्म्यं रौप्यं सुमणिरचितं वैजयन्तं तथान्यं
मातः किं किं सुनयनपथैर्लोक्यते भूविशिष्टम् ॥७१॥

मातस्स्वर्गे कुशलनटनं ह्यप्सराणाञ्च दृष्टं
गन्धर्वाणां मधुरवचनैस्सामगानं श्रुतं किम् ?
लब्धुं कामं सुरतरुवरः कल्पवृक्षो नुतश्च
मातस्स्वर्गे ह्यमृतसुपयःकामधेनू र्नुता किम् ?॥७२॥

१२. सृष्टिशून्यं तदा स्यात्

श्वेतं शैलं हिमनदयुतं राजते ह्युत्तरस्यां
ईदृग् 'झर्झर्' कलकलरवै र्दुग्धधाराप्रपाताः ।
मन्दं वायुः प्रवहति सदा मातृदेहं सुपृश्य
आकाशाद्वै सुशिशिकिरणैः साधु गन्धान् प्रसार्य ॥७३॥

नो स्यान्मातुर्विपुलममता चालिता स्याच्च सृष्टिः ?
सेवाभावं न मृदुहृदये जीवनं स्याच्छिशूनाम् ।
प्रेम्णा पत्नी न वदति रसं जीवनं किं पतीनां
माता न स्यात् सुभुवनतले सृष्टिशून्यं तदा स्यात् ॥७४॥

बालं दृष्ट्वा तव हृदयतो दुग्धधाराः पतन्ति
हास्ये बाले नयनपथि ते जायते चेद् विमोहः ।
आस्यं दृष्ट्वा यदि पिबति चेत् बालको दुग्धधाराः
ब्रह्मानन्दं तव मनसि वै जायते दृश्यते स्म ॥७५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुक्षौ स्थित्वा पिबति च शिशुर्दुग्धधारां विशेषां
हस्तैर्वक्षःस्थलमपि तदा कृष्यते बालभावैः ।
स्तन्याभावे नु भुजयुगलैर्गृह्यते रुद्यते च
कष्टं सोढ्वा तदपि शिशवो लाल्यते पाल्यते च ॥७६॥

मालाकारास्त्वमिति जननी ह्यर्णवे कर्णधारो
मार्गे त्वं सारथि-रथपतिः खे च वैमानिकस्त्वम् ।
हर्म्ये माता ननु गृहपती रक्षिका भूतसंघात्
वैद्यो भूत्वा विविधविधिना सेवसे स्कन्धमूलैः ॥७८॥

ज्ञानं नव्यं मधुरवचसाऽपाठयत् बाल्यशब्दं
'मामा' 'पापा' इति च वदने शिक्षितोऽहं त्वया च ।
'चाचा' 'चीची' मधुरवचनैर्बोधितोऽहं त्वया च
पाटीपत्रे सरलविधिना देशितोऽहं त्वया च ॥७९॥

माता मे सा गुरुरिव गुरुर्ज्ञानदात्री प्रदात्री
धैर्यं धृत्वा मृदुलवचसा ह्यक्षराणां प्रदात्री ।
दुर्गाख्या त्वं सरलविधिना कच्छपीवादिका च
वर्णानां त्वं सुमधुरलयैः साधिका गायिका च ॥८०॥

१३. जननि ! मध्यरात्रौ क्व याता

मासादेकात् त्वमपि जननी श्वासकासैश्च रुद्धा
नीता त्वं वै विबुधतनुजैस्तत्र भैषज्यगेहे ।
स्वस्था भूत्वा गृहमपि तदा ह्यागता दैवयोगात्
किञ्चित् स्वस्थं त्वमिति मनसा तत्र तुष्टा वयञ्च ॥८१॥

यावत् मासं त्वमपि जननी स्वस्थतां वै प्रयाता
तस्मिन् काले वसतिपरितो दृश्यमाना ह्यभूच्च ।
हास्यैर्युक्तं तव च वदनं सुन्दरं दृश्यतेऽथ
मन्दं मन्दं तव च वचनं पीतवन्तो वयञ्च ॥८२॥

अर्धं मासं त्वमपि जननी सेव्यमाना सुतैश्च
तीर्थक्षेत्रे पशुपतितटे वासिता पुत्रगेहे ।
रुग्णासि त्वं वयमपि सदा सेवने तत्पराश्च
भोज्यं पेयं वसनशयने ष्ठीवनस्य प्रबन्धः ॥८३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पथ्यं पेयं नु मृदुवसनं ह्यग्निनतापस्तथैव
प्राणो वायुः [४] त्वयि सपदि भो स्थापितः प्राणने च ।
यत् किञ्चित् स्यान् मम च जननीपूजने सेवने च
सर्वं कृत्यं प्रणतशिरसा पुत्ररत्नैः कृतञ्च ॥८४॥

स्वस्था भूत्वा मुदितमनसा गन्तुकामा स्म गेहं
मासं स्थित्वा व्रजसि जननी स्वस्थभावेन तुष्टा ।
पौत्र्याः पाणिग्रहणसमये तुष्टिता मोदिता च
त्यक्त्वा पुत्रान् झटिति जननी मध्यरात्रौ क्व याता ? ॥८५॥

१४. वेदना नैव पृष्टा

अन्त्ये काले तव च नयने भ्रंसिते केन हेतोः
मन्दं मन्दं सुनयनमभूत् तद्धि स्तब्धं कथं भो !
शैथिल्यं यत् वचसि मनसः प्रायशो यत् प्रतीतं
मन्दं मन्दं नु हृदयगतिः प्राणवायुश्च श्रान्तौ ॥८६॥

स्वैदैः क्लिन्नं खलु तव वपुः कष्टजातं विशिष्टं
घोरैः दुःखैः खलु तव वपुः पीडितं घातितञ्च ।
शैथिल्याद् वै वचनरहिता त्वं च माता प्रयाता
अन्त्ये काले कति च कठिना वेदना नैव पृष्टा ॥८९॥

तस्मिन् प्रातस्तव मृदुपदौ वन्दितौ श्रद्धितेन
शैथिल्यात् ते सुगलितवपुर्वाक्यजातञ्च रुद्धम् ।
मृत्योर्युद्धेऽतिकठिनतरा वेदना नैव पृष्टा
अन्त्ये काले कति च कठिना वेदना नैव पृष्टा ॥९०॥

मातुर्हेतोः स्वसुतवनिता पूजने ते क्रतौ च
लग्नाश्चासन् भृगुसुदिवसे शान्तिवाञ्छा च तेषाम् ।
सर्वैः पुत्रैः पदमपि नुतं दैवयोगात् त्वदीयं
अन्त्ये काले कति च कठिना वेदना नैव पृष्टा ।९१।

---

[४] **प्राणे वायुः** - अक्सिजन ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मध्ये रात्रौ तव शिथिलता वर्द्धमाना च जाता
स्वासो रुद्धो बत यमभटैः त्वाञ्च ह्याक्रम्य क्रूरैः ।
नीता घोरे किल वियति त्वं प्राणवायुर्गतश्च
अन्त्ये काले कति च कठिना वेदना नैव पृष्टा ॥९२॥

१५. स्वर्गता मेऽद्य माता

स्नेहं कृत्वा स्वजनसहितान् पुत्रपौत्रान् विशेषं
सेवां कृत्वाऽतिथिगृहगतान् दुग्धधारैश्च साज्यैः ।
घासैः पानैः खलु गृहपशून् तोषयित्वा तदानीं
तृप्तान् कृत्वा स्वपरिजनकान् स्वर्गता मे च माता ॥९३॥

अष्टौ पुत्रान् प्रियतमशिशून् पालयित्वा च प्रेम्णा
दुःखैः कष्टैरशनवसने प्रापयित्वा च सर्वान् ।
कष्टैः पुत्र्यौ प्रियतमधवे ह्यर्पयित्वा सुरम्ये
ईशं स्मृत्वा सुगगनपथैः स्वर्गता मे च माता ॥९४॥

तीर्थं तीर्थं हिमगिरिगृहात् सिन्धुयोगे[५] गता त्वं
दाक्षिण्ये वै स्वधवसहिता सेतुयोगे[६] गता त्वम् ।
प्राप्तासीत् सा स्वजनसुजनैर्दर्शनार्थं सुराणां
आर्यावर्ते भ्रमणकुशला स्वर्गता मे च माता ॥९५॥

बद्रीं काशीं बहुविधनदीं तत्र केदारखण्डं
कालिन्दीं सा खलु त्रिपथगामेतयोः सङ्गमे[७] च ।
तीर्थे वासं ननु कृतवती पुण्यगङ्गोत्तरीये
आर्यावर्ते भ्रमणकुशला स्वर्गता मे च माता ॥९६॥

---

५. गङ्गासागरः इत्यर्थः ।
६. रामेश्वरः इत्यर्थः ।
७. प्रयागराजः इत्यर्थः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नित्यं काल्याः नमनकुशला मुक्तिनाथञ्च कालीं
कण्ठे नीलं पशुपतिभवं तत्र गुह्येस्वरीञ्च ।
हैमीं कोशीं जनकतनयां सा सरामं जलेशं
नत्वा देवान् स्वजननधरां स्वर्गता सा च माता ॥९७॥

१६. अस्माभिस्ते प्रियतरवपुर्भस्मयित्वा विनष्टम्

मातुः शुक्लं प्रसृतवदनं दानशीलौ च हस्तौ
तर्दूहस्तौ ह्यतिथिसुकृते दर्वीहस्तं तथैव ।
आतिथ्ये वै पुलकितहृदा सेवितो योगिराजश
चास्माभिस्ते प्रियतरवपुर्भस्मयित्वा विनष्टम् ॥९८॥

हस्तैर्मात्रा कमलतनयास्सेविताः प्रेमभावैः
तैलं स्नानं शयनमशनं केशवेशं करोषि ।
शुक्लं वालं सुनयनपथैश्चुम्बनं त्वं करोषि
मातुश्शौक्ल्यं प्रियतरवपुर्भस्मयित्वा विनष्टम् ॥९९॥

स्नेहैर्नित्यं शिशुनयनयोः कज्जलं त्वं ददासि
स्नेहैर्नित्यं श्रवणपथयोः कुण्डले त्वं ददासि ।
स्नेहैर्नित्यं भुजयुगलयोः कङ्कणौ त्वं ददासि
ईदृग् मातुः प्रियतरवपुर्भस्मयित्वा विनष्टम् ॥१००॥

नित्यं भोज्यं दधिमधुघृतं कालशेयं ददासि
दुग्धं तक्रं ननु सुमधुरं यच्च हैयङ्गवीनम् ।
क्षीरं भक्तं ननु दधियुतं रुच्यशाल्योदनञ्च
इत्थं मातुः प्रियतरवपुर्भष्मयित्वा विनष्टम् ॥१०१॥

ऊढ्वा मां त्वं नयसि च सदा तच्च कूपे ह्यरण्ये
धान्ये क्षेत्रेऽजवृषचरणे चोत्सवे मन्दिरे च ।
प्रेम्णा पुत्रान् धरसि च सदा सेवसे दुःखजालै-
रित्थं मातुः प्रियतरवपुर्भस्मयित्वा विनष्टम् ॥१०२॥

१७. मम मातरं सुजननीं 'कुक्षौ प्रभो स्थापय'

अम्बा मे सरला तथा सुहृदया पुत्रप्रिया स्नेहतः
गोभक्ता सुकरेण शुभ्रविधिना चातिथ्यसेवारता ।
वृद्धानां ननु सेविका सुकलया कव्येऽपि सेवारता
प्रेम्णाऽसौ मम मातरं कुलमणिं 'कुक्षौ प्रभो स्थापय'॥१०३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालानां मृदुभाषिका सुकलया खाद्यस्य पेयस्य च
नित्यं दानरता तथा शिवनता सत्यस्य संश्राविका ।
पत्युः प्रीतिकरा सुमिष्टवचनैः कर्तव्यमार्गे स्थिता
प्रेम्णाऽसौ मम मातरं कुलवधूं 'कुक्षौ प्रभो स्थापय'॥१०४॥

नित्यं यज्ञरता च क्रोधरहिता लोभस्य दुत्कारिका
ईशे भक्तिरता चराचरकृतौ धर्मस्य सा पालिका ।
नित्यं पूजनशालिनी सुरनता सत्यस्य या सेविका
प्रेम्णाऽसौ मम मातरं पतिरतां 'कुक्षौ प्रभो स्थापय'॥१०५॥

वेदान्तेऽपि विचक्षणा मुनिकृतौ तन्त्रे पुराणे तथा
निष्ठावैदिकमर्धकर्मनिलये श्रोतुं सदा तत्परा ।
जीवानां हितसाधिका श्रुतिनता शास्त्रस्य सा पालिका
प्रेम्णाऽसौ मम मातरं हितकरीं 'कुक्षौ प्रभो स्थापय'॥१०६॥

हर्म्ये कान्तिमती सुहास्यवदना लक्ष्म्या गृहे साधिका
साध्वी सा कुलदीपिका कुलनता पाराशरे चागता ।
नित्यं सत्त्वसती सुग्राम्यरुचिरा दुर्गेति ख्याता बभौ
प्रेम्णाऽसौ मम मातरं गुणवतीं 'कुक्षौ प्रभो स्थापय'॥१०७॥

१८. शोके निमग्ना वयम्

हर्म्येऽसौ पदलाञ्छना, सुवसनच्छाया सदा दृश्यते,
मञ्जूषा परिदृश्यते च निलये काष्ठेन या निर्मिता ।
भाण्डं कांष्ठसुनिर्मितं मधुघृतै र्दध्ना च सम्पूरितं
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥१०८॥

गोष्ठे गोमहिषीवृषाः सुनयनैः पश्यन्ति ते त्वां सदा
नित्यं ते ध्वनिभिः स्वतानसहितैः कुर्वन्ति प्रश्नान् सदा ।
माता कुत्र गताऽद्य सेवनरता चास्मत्सहाया सदा
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥१०९॥

शालेये तव लाञ्छना किशलये क्षेत्रे प्रपाते तथा
क्षेत्रादौ विपिने पदं प्रतिपदं चिह्नं दरीदृश्यते ।
ग्रामे ते पशुपक्षिभावनिरताः स्मृत्वा रुदन्तः सदा
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥११०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बाला ग्रामरता नु खेलनिरता दध्ना सदा सिञ्चिता
कापट्यै रहिता सुकेशसहिता शाट्यां सदा गुम्फिता ।
तेषां तत् परिप्रश्नजातभरितं श्रुत्वा च मोहं गता
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥१११॥

वासं शून्यं वसतिपरितो ह्यम्बरं तच्च शून्यं
गोष्ठं शून्यं वसतिपरितो शून्यग्रामाः समेषाम् ।
अस्माकं यत् रुदितहृदये भावशून्यं च जातं
मात्रा हीनं त्रिभुवनमिदं नारकीयं विभाति ॥११२॥

शून्यं मे किल जीवनं रसगतं मात्रा विहीनं जगत्
शून्यं मे भवनं च शून्यहृदयं कृष्णायितो भास्करः ।
कृष्णा भाति च चन्द्रिका रसमयी मातर्गतायां त्वयि
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥११३॥

शान्ता सा च सदैव मे स्मितमुखी माता मुदा शङ्करी
सेवायां निरता च देवयजने हव्ये च कव्ये रता ।
आतिथ्ये रमते सदैव जननी देवाश्च ते जङ्गमाः
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥११४॥

पुत्राणां किल सेवने च कथने हर्म्ये सदा भोजने
बालानां ननु खेलने सुवचनैर्यस्या भवत्युत्सवः ।
ग्रामं या स्मरति प्रपौत्रसहितं ह्यन्ते च काले स्वयं
स्मृत्वा त्वां बत साश्रुनेत्रनिवहैः शोके निमग्ना वयम् ॥११५॥

इति नेपालस्य गोरक्षजनपदस्य कट्टेलग्रामाभिजनेन पराशरगोत्रस्य
रोहिणीदेवीहोमनाथयोः प्रपौत्रेण यदुमायाटीकादत्तयोः पौत्रेण,
दुर्गाकुमारीहरिकृष्णयोः
पुत्रेण पाराशर्येण नवराजकट्टेलमहोदयेन विरचितं
(२०७१ तमस्य वैक्रमाब्दस्य चैत्रमासस्य २३ दिनाङ्कतः प्रारभ्य २९
दिनाङ्कपर्यन्तं लिखितम्) मातृशतकं शोककाव्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9902-2-6
9 789937 990226